वीणानादमहारसा स्वरवधूः ॐकारझंकारिता
शब्दादावइउण् शिवेति सुषमा शेषाहलान्तर्गता ।
शब्दब्रह्मचतुर्दशी सुरगवी निर्वाणवेदात्मिका
गौरी संस्कृतभारती विजयते कुर्यात्सदा मङ्गलम् ॥

षड्दर्शनामृतमहारसधारकाय
सन्न्यासिने निखिलमानवमानसाय ।
कारुण्यपात्रमहते रविशंकराय
साष्टांगयोगनिरताय नमो नमस्ते ॥

शिक्षा सर्वेषां मानवानां कृते परमावश्यकी । मानवानां निखिलं जीवनं शिक्षाश्रितमेव वेद्यम् । सा विद्या या विमुक्तये 1 अपि च अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते2 इति विद्यायाः अभीप्सा सुस्पष्टा । शिक्षा मातृवत् संरक्षिका, पितृवत् पथप्रदर्शिकास्ति3 । शिक्ष-विद्योपादाने इत्यस्माद्धातोः गुरोश्च हलः इति पाणिनीयसूत्रेण अ-प्रत्यये सति अजाद्यतष्टाप्4 अनेन टापि शिक्षाशब्दो निष्पन्नः । शिक्षेर्जिज्ञासायां5 इति वार्त्तिकेण यदा जिज्ञासा समुदेति तदा शिक्षायाः आवश्यकता जायते । यत्र जिज्ञासा नास्ति तत्र विद्या नास्ति। सुतरां शिक्षा न केवलं मानवानामपितु सर्वप्राणिनां जिज्ञासात्मिका प्रवृत्तिरेव ।6

तत्र भाषानाम अभिप्रायप्रकटसाधनम् । भाषणात्भाषा । अथवा भाषयतीति भाषा। समग्रे विश्वे त्रीणि सहस्राणि भाषाः प्रचलन्ति ।7 सर्वासु भाषासु संस्कृतभाषा सुमधुरा सरला च । या सर्वासां भारतीयभाषाणां जननीति व्यपदिश्यते । अस्याः भाषायाः तुलना नास्ति । सर्वतन्त्रस्वतन्त्रा इयं सुरभारती न केवलं भारतवर्षे अपितु समग्रे विश्वे परिव्याप्ता । भारतीयवाङ्मये चिरकालादद्यावधि प्रचलिता । तथाहि - यावत्भारतवर्षं स्यात् यावत् विन्ध्यहिमाचलौ । यावत् गंगा च गोदा च तावदेव हि संस्कृतम् ॥ 8 संस्कृतं भारतीयसंस्कृतेः आत्मा । संस्कृतमाध्यमेन भारतीय-संस्कृतिः चिरन्तनी । यस्य कस्यापि जनस्य कृते इयं भाषा अत्यावश्यकी । तस्य सामाजिकः बौद्धिकः राजनैतिकः सांस्कृतिकश्च विकासः अनया भाषया

जायते ।9 भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा10 अर्थात् न केवलं भारतस्य अपितु समग्रविश्वस्य मुकुटायमाना भारतीयसंस्कृतिः । सुतरामस्य सांस्कृतिकमहत्त्वं सुविदितमेव । यच्चोक्तं कर्णाकर्णिकायां -संस्कृतं संस्कृतिर्ज्ञेया संस्कृते सकला कलाः । संस्कृते सकलं ज्ञानं संस्कृते किं न विद्यते ॥ न हि ज्ञानेन सदृशं पवित्रमिह विद्यते11 आधुनिकभारते संस्कृत-शिक्षणस्य महत्त्वमपि वैज्ञानिकैरंगीकृतम् । भारतीयभाषाणां परिरक्षणं तु संस्कृतेन विना असम्भवम् । शैक्षिकविकासः बौद्धिकविकासः चारित्रिकविकासः आत्मानुसन्धानं च सर्वे विषयाः संस्कृते उपनिवद्धाः । संस्कृतशिक्षायाः उद्देश्यं तु न केवलं कर्मकाण्डमेव अपितु वैज्ञानिकदृष्ट्या विचार्यमाणे सर्वादौ अस्याः दिशानिर्धारणं कर्त्तव्यम् । द्वितीयं तावत् प्राचीनधारायाः आमूलचूलपरिवर्तनम् । अन्तिमोद्देश्यस्य निर्धारणं विवेकेन करणीयम् । संप्रति संस्कृतशिक्षायै संगणकयन्त्रस्य प्रभावो विचार्यते । 12

तत्र cumputer नाम अत्याधुनिकविज्ञानस्य प्रायोगिकक्षेत्रम् । यान्त्रिकपद्धत्या सूक्ष्मातिसूक्ष्माणि कार्याणि स्वल्पसमयेन संप्रति वयं कर्तुं समर्थाः । द्रूततरे गतवति संसारे सर्वे वयं चलचञ्चलाः कार्यव्यस्ताः । internet विहाय अस्माकं कार्यं नास्ति । दूरभाषे ओतप्रोताः । मुखपुस्तके ट्विटरे अन्तर्जालसंकेते यत्र कुत्रापि संगणकस्य आवश्यकता अनिर्वार्या । संस्कृतं वैज्ञानिकम् । यदि महाविज्ञानस्य संस्कृतस्य cumputerरीकरणं क्रियते तर्हि तस्य प्रयोगक्षेत्रं प्रतिदिनं विवर्धते इत्यत्र नास्ति विसंवादः । एतदर्थं बहुकार्यं संसाधितं सरलितं च महानुभावैः प्रो०मदनमोहन झा महोदयैः । धन्यवादार्हा भवन्तः । संस्कृतस्य प्रचार-प्रसारदृष्ट्या तैरखिला व्यवस्थाः software माध्यमेन संयोजिताः । दुर्लभ-दुष्प्राप्य-दुर्मूल्यकोशग्रन्थाः पाणिनीय-व्याकरणादीनि बहूनि शास्त्राणि संप्रति software माध्यमेन सरलीकृतानि mobile phone क्षेत्रेषु सुव्यवस्थितानि च दृश्यन्ते । एतदतिरिक्तं ज्योतिष-दर्शनादीनि बहुशास्त्राण्यपि तैः चित्रमाध्यमैः सुसज्जितानि । पाठकानां छात्राणां शिक्षकाणां च बहु-उपकाराय दिग्दर्शका इव ते नियुक्ता अन्तर्जाले । google play store इत्यत्र महानुभावानां सर्वे software वर्तन्ते । संप्रति अन्येषु विभिन्नेषु website स्थलेषु Wikipedia आदिषु संस्कृतभाषा चलचञ्चला । facebook ,whatsapp messenger, telegram ,mail ,instagram ,print midia,

electronic midia इत्यादिषु संप्रति वयं जागरिताः। केनोपायेन अस्माकं कार्यक्रमः उत्तरोत्तरं वर्धिष्यति तस्य कृते अधुना प्रयत्नः करणीयः।

सर्वादौ computer शिक्षा । तस्मिन् संस्कृतभाषा टंकणीया । तया भाषया सर्वाणि संगणककार्याणि । एतदर्थं अद्यतनी राष्ट्रिय-प्राविधिक-कार्यशाला संगोष्ठी । महापुरुषेण महायोगि-रविशंकरेण विनिर्मितोयं श्री श्री विश्वविद्यालयः । विश्वविद्यालयेन संचालिता महागोष्ठी । अस्यां गोष्ठ्यां केनोपायेन अन्तर्जाले वयं शक्ताः संस्कृतसंरक्षणे च सिद्धा भवाम इति शिक्षा प्राप्यते।

शिक्षा facebook संचालनीयः। विभिन्नेषु groupषु संस्कृतलेखः प्रेषणीयः। लेखकानां लेखः पठनीयः। मन्तव्यो देयः। विसंवादो मा ब्रुहि। messenger whatsappआदिभिः प्रेषणीयः। whatsapp group करणीयः। तत्रापि सक्रियो भवेत्। telegram instagram mail yahoo web site wikipidia आदिषु social midiaषु कार्यं करणीयम्। facebookषु प्रयोगात्मक-संस्कृतशिक्षणाय प्रचाराय च दृश्य-श्रव्यकाव्यानि आयोजनीयानि ।

Picture-poster-banner-माध्यमैः सर्वादौ शिक्षणं पश्चात् संस्कृतस्य प्रचारः प्रसारोपि क्रियते। print midiaषु पत्रपत्रिकासु सम्बादपत्रेषु वर्त्तमानेषु संस्कृतकार्यं नितरां श्लाघनीयम् । electronic midia-Tv-Redio-FM-इत्यादिषु बहुलतया प्रचारेण संस्कृतस्य शिक्षणं संस्कृतेश्च रक्षणं भविष्यति। एतेषामुपयोगेन वयं यत्नशीलाश्चेत् संस्कृतमयं भारतं भविष्यति । अस्माकं लोकभाषा संस्कृतं भविष्यति।

सांप्रतिके काले Facebookक्षेत्रे संस्कृतभारतं , संस्कृत-पद्य-रचनम् कवयो वयममी, वन्दे वाणीविनायकौ, काव्यादर्शः, चिरन्तनी, मण्डपम्, काव्यामृतवर्षिणी, विश्वसंस्कृतकुटुम्बकम्, वैदिकगणः, Sanskrit poet conference, UGC,NET,/ SET/JRF/TGT/PGT, Sanskrit news paper, Sanskrit speakers, संस्कृतधारा, center for Sanskrit information,संस्कृतसर्जना, Sanskrit ganga, Sanskrit sahitya academy, सार्वभौम

संस्कृत-प्रचार-संस्थानम्, सरलसंस्कृतशिक्षणमित्यादयः समलंकृताः समूहाः groups प्रसिद्धाः सन्ति । संस्कृतसम्बन्धीय –बहुwebsite सन्ति । तेषु archive.org,open library.org, Sanskrit document.org, muktabali.org,Sanskrit.nic.in, sanskritdictionary.com, vedic grantg.org, scribd.com, इत्यादयः सुप्रसिद्धाः । यत्र सहस्राधिका Ebooks उपलभ्यन्ते । print midia क्षेत्रे international journal of Sanskrit research, jahnabi Sanskrit journal, prachi prajna, jagannath jyoti, Sanskrit news paper कृते विश्वस्य वृत्तान्तः, सुधर्मा, गीर्वाणी, सप्तगिरिः,आरण्यकम्, आर्षज्योतिः, संस्कृतामृतम्, शोधप्रभा, संस्कृतविमर्शः,देवसायुज्यम्, हितसाधिका,दिव्यज्योतिः, प्रतिष्ठा, सम्भाषणसन्देशः, रसना,कामधेनुः,धीमहि,दूर्वा, शारदा, गुंजरवः, स्रग्धरा, अमृतभाषा, प्रियवाग्, दिग्दर्शिनी, संस्कृतमन्दाकिनी, लोकप्रभा, प्राचिसुधा, लोकभाषासुश्रीः, विश्वसंस्कृतम्, भारती, आदयः विराजन्ते । एते सर्वे संस्कृतक्षेत्रे द्रूततराः नवीनशिक्षणोपायाः वर्तन्ते भारतवर्षे13 । जयतु भारतम् । जयतु संस्कृतम्

पादटिप्पण्यः-

१-तैतरीये

२-ईशावास्याम्

३-भर्तुहरिणा

४-पा०सू०-४-१-४

५-अष्टाध्यायां-१-३-१२१

६-काशिका०पृ५१

७-शैक्षिकप्रविधिः-पृ९

८-तत्र

९-भारतस्य सांस्कृतिकनिधिः पृ-१२१९

१०-भ०गी-४-३८

११-शिक्षाशास्त्रपरिशीलने पृ७

१२-sanskrit.org

विषयः-संगणकयन्त्र-चलदूरवाणीयन्त्र-अन्तर्जालसंसाधन-विकीपीडिया-ट्विटर-फेसवुक-एप इत्यादि संसाधकानां संस्कृतशिक्षणे उपयोगः ।

अध्यापकः-

डः प्रदीप्त कुमार नन्दः

दूरभाषः- 9937431632